A

കണ്ണൂർ ജില്ലാപഞ്ചായത്ത്
ഡയറ്റ് കണ്ണൂർ-സമഗ്രശിക്ഷാ കേരളം കണ്ണൂർ
സമഗ്രവിദ്യാഭ്യാസപദ്ധതി

SMILE 2023 – SSLC Annual Examination February 2023

# संस्कृतम्

**समयः - एकार्धहोरा** **अङ्काः - ४०**

---

**निर्देशाः**-*१५निमेषाः समाश्वासकालाः। प्रश्नान् पठितुम् इच्छानुसारं चयितुम्,उत्तराणि क्रमीकर्तुं च अयं समयःउपयोक्तव्यः।

* प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लिखत ।
* उत्तरलेखने मूल्याङ्काः,कालः च परिगणनीयाः ।
* विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानां उत्तरलेखने देवनागरीलिपिः उपयोक्तव्या ।

---

**1.अधोदत्तेषु चतुर्णां प्रश्नानां उत्तराणि लिखत ।** **4 x 1 = 4**

क) तुष्टिः केषाम् उत्तमं भवति ?
(लाभानाम्, सुखानाम्, धनानाम् )

ख) कः धृतराष्ट्रमुपेत्य पाण्डवाः सविशेषश्रद्धाम् अर्हन्ति इति उपदिशति ?
(व्यासः , वाल्मीकिः दुर्योधनः )

ग) गणयामास इत्यस्य लकारः कः ?
(लट् , लिट् , लङ् )

घ) यमनचिकेतसंवादः कस्यां उपनिषदि प्रतिपादयति ?
(मुण्डकोपनिषदि , तैत्तिरीयोपनिषदि , कठोपनिषदि )

ङ) वृक्षायुर्वेदस्य कर्ता कः ?
(चरकः , सुरपालः ,वाग्भटः )

**2.यथोचितं योजयत ।** **4 x 1 = 4**

क) नैषधीयचरितम् - पार्वती
ख) कुमारसम्भवम् - द्रौपदी
ग) रघुवंशम् - दमयन्ती
घ) किरातार्जुनीयम् - सीता

**3. उदाहरणानुसारम् पदच्छेदं लिखत ।** **1 x 1= 1**

उदा. - केयम् - का + इयम्
सेयम् - — + ——

**4. उदाहरणानुसारम् एकपदं लिखत ।** **1 x 1 = 1**

उदा - राष्ट्रस्य पतिः - राष्ट्रपतिः ।

कुलस्य पतिः - ——— ।

**5.अधोदत्तवाक्यात् संबोधनारूपं चित्वा लिखत ।** **1 x 1 =1**

वत्से ! त्वमिदानीमनुशासनीयासि ।

**6-10 प्रश्नेभ्यः <u>चतुर्णां</u> उत्तराणि लिखत ।** **4 x 2 = 8**

**6 श्लोकं पठित्वा अधोदत्तेभ्यः उचितं आशयं चित्वा लिखत ।**

उत्तिष्ठत जाग्रत
प्राप्य वरान्निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया
दुर्गं पथस्तत्कवयो वदन्ति ।।

(क) अज्ञानिनः निरङ्कुशाः भवन्ति ।

(ख) स्वयं पण्डितंमन्याः अज्ञाः कुपन्थानं प्राप्नुवन्ति ।

(ग) अज्ञानं दूरीकर्तुं श्रेष्ठान् उपगच्छन्तु ।

**7. गद्यक्रमं पूरयत ।**

यदा पुनस्त्वं भजनं करोषि
तदा समो मा भव दाम्भिकैःत्वम् ।
परावलोकाय हि ये भजन्ति
समाजगेहे च चतुष्पथे च ।।

**गद्यक्रमः** - पुनः यदा त्वं ——. करोषि तदा त्वं ये ———समाजगेहे च———.च भजन्ति हि——
समः मा भव ।

**8.वाक्यं पठित्वा शतृ-शानजन्तरूपाणि चित्वा लिखत ।**

शुनकात् भीतः कम्पमानः बालः क्रीडाङ्गणात् रुदन् गृहं प्रविवेश ।

**9.उदाहरणानुसारम् वाक्यं परिवर्तयत ।**

उदा - अहं पाठं सुष्ठु अपठम् । पूर्णाङ्कं न सम्प्राप्तवान् ।

यद्यपि अहं पाठं सुष्ठु अपठम् तथापि पूर्णमङ्कं न सम्प्राप्तवान् ।

जनाः भोजनशालां अगच्छन् । भोजनं न प्राप्तम् ।

**10. वाक्यं पठित्वा क्त्वान्त-तुमुन्नन्त पदानि विविच्य लिखत।**

कविः नदीतीरं गत्वा कवितां लेखितुं आरभत।

**11-13 — प्रश्नेभ्यः द्वयोः उत्तरे लिखत ।** **2 x 4 = 8**

11.**अधोदत्तं श्लोकं पठित्वा उत्तराणि लिखत ।**

इमामहं वेद न तावकीं धियं
विचित्ररूपा खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं **ममाधयः** ।।

(क) चित्तवृत्तयः कीदृशाः भवन्ति ?

(ख) श्लोकात् एकं क्रियापदं चित्वा लिखत ?

(ग) अधोरेखाङ्कितपदस्य पदच्छेदं लिखत

(घ) **मनः** इत्यर्थे प्रयुक्तं पदम् किम् ?

**12.सूचनानुसारं किरातार्जुनीयमधिकृत्य टिप्पणिं लिखत ।**

भारविः ——.. अर्थगौरवः —. अष्टादश सर्गाः ————. कौरवपाण्डवकथा —— वनं प्रविष्टाः ——.. पाञ्चाली युधिष्ठिरभाषणम् ।

**13.खण्डिकां पठित्वा उत्तराणि लिखत।**

आभारतम् अद्वैतचिन्ताधारां प्रतिष्ठितवान् केरलीयाध्यात्मीकाचार्यः भवति श्रीशङ्कराचार्यः। अनेन विरचितं स्तोत्रकाव्यं भवति सौन्दर्यलहरी । मातरं स्मृत्वा तेन लिखितं काव्यं भवति मातृपञ्चकम् । तस्य महाशयस्य जीवनचरितमधिकृत्य माधवविध्यारण्यस्वामिना विरचितं महाकाव्यं भवति शङ्करदिग्विजयम् । आचार्येण भगवद्गीतायाः ब्रह्मसूत्रस्य दशोपनिषदः च भाष्यं रचितम् । तत् प्रस्थानत्रयं इति नाम्ना प्रसिद्धं भवति ।

क) मातृपञ्चकम् केन विरचितम् ?

ख) माधवविध्यारण्यस्वामिना विरचितं महाकाव्यं किम् ?

ग) खण्डिकातः क्त्वान्तपदं चित्वा लिखत ?

घ) आचार्येण केषां भष्यं रचितम् ?

**14-16- प्रश्नेभ्यः द्वयोः उत्तरे लिखत ।** **2 x 4 = 8**

**14.पट्टिकां पूरयत ।**

| **निर्वचनम्** | **सस्यविभागः** | **उदाहरणानि** |
|---|---|---|
| फलपाकान्ताः | ————... | कदली |
| ————... | वृक्षः | आम्रः |
| अव्यक्तपुष्पाः | वनस्पतिः | ——————. |
| प्रतानैः प्रसारिता | —————. | कूश्माण्डः |

**15. सूचनानुसारं जीवनचरितं लिखत ।**

नाम - त्यागराजस्वामि ।

जन्म - १७६७ मेय् ४ , तञ्चावूर् ।

पितरौ - रामब्रह्मः सीतम्मा च ।

प्रशस्तिः - कर्णाटकसंगीतज्ञः , वाग्गेयकारः ।

कृतयः - पञ्चरत्नकीर्त्तनानि ।

मृत्युः - १८४७ जनुवरि ६ ।

**16.सम्भाषणांशान् पूरयत ।**

पिता - पुत्र अद्य विद्यालयं न गच्छसि किं ?

पुत्रः - आम् । विद्यालये संस्कृतनाटकपरिशीलनमस्ति ।

पिता - ————..नाम किम् ?

पुत्रः - नाटकस्य नाम महाकवि कालिदासस्य ————. ।

पिता - अभिज्ञाशाकुन्तले नायकः ——. खलु ?

पुत्रः - आम् नायिका ——. च भवति ।

पिता - अस्तु शुभकामनाः ।

**17.प्रादेशिकभाषायां विवर्तयत ।** **5**

भारतस्य कथासाहित्यमण्डले जातककथाः नितरां शोभन्ते । एताः कथाः बौद्धधर्मेण सम्बन्द्धाः । गौतमबुद्धस्य पूर्वजन्म कथा एव अत्र प्रतिपाद्यविषयः । अत्र मनुजपक्षिमृगादीनां कथाद्वारा प्रपञ्चे जीवनस्य नश्वरतां सदाचारजीवनस्य प्रसक्तिं च आविष्कुर्वन्ति । अस्य ग्रन्थस्य रचना पालिभाषायां भवति ।

*************************************